- Title – गौसावित्री पद्धति
- Accession No – Title –
- Accession No –
- Folio No/ Pages – 7/14
- Lines-
- Size
- Substance Paper –
- Script Devanagari
- Language – संस्कृत
- Period –
- Beginning – अथ गौदानविधिर्लिख्यते । अथ पञ्चमनः सुस्नातः प्रक्षालित पाणि पादौ स्व चांतः ।
- End – अजाविकायास्तनानाभि मध्येस्थः पुरे दद्याच्चैव भागे । इति श्री गौसावित्री पद्धतिः । समाप्तश्च दशाम् ॥
- Colophon-
- Illustrations -
- Source -
- Subject - संस्कृत (गौ सम्बन्धी)
- Revisor -
- Author -
- Remarks- पूर्ण है ।

Nandini
Radha

॥९०॥ श्रीगणेशाय नमः॥ अथ गोदानविधिर्लिख्यते॥ अथ यजमा
नः सुस्नातः प्रक्षालितपाणिपादो स्वाचांतः गोमयोपलिप्तायां भू
मौ स्वासने समुपविश्य॥ करे पवित्रो गृहीत्वा॥ आचम्य प्राणायामं
कृत्वा॥ देवान् गुरून् नमस्कृत्य॥ अथ संकल्पः॥ ॐ अद्य श्रुतिस्मृ
तिपुराणोक्तपुण्यफलप्राप्तिकामः॥ श्रीयज्ञपुरुषगोविंदप्रीतये
गोदानमहं करिष्ये इति संकल्पः॥ स्वस्य दक्षिणतः उदङ्मुखो ब्रा आ
सने उपविश्य॥ ॐ गवे नमः त्रिः संपूज्य॥ ॐ ब्राह्मणाय नमः त्रिः सं
पूज्य॥ गां ददामीति ब्राह्मणकरे जलदानं तांबूलपूंगीफलवा

गी·प

॥२॥

2

3

राम

॥२॥ २॥

वसोः॥ चंद्रार्कशक्रशक्तिर्या धेनुरूपास्तु सास्वता॥ ॐ गाभ्यां नमः॥ पुनः
पुष्पाणि गृहीत्वा॥ चतुर्मुखस्य यालक्ष्मी यालक्ष्मीधनदस्य च॥ ल
क्ष्मीर्या लोकपालानां सा धेनुर्वरदास्तु मे॥ आस्याय नमः॥ पुनः पुष्पा
णि गृहीत्वा॥ स्वधा चापि त्वपुष्पानां स्वाहा हुतभुजां तथा॥ सर्वपापह
रा धेनुस्त [illegible] स्माच्छांतिं प्रयच्छ मे॥ गोपुच्छाय नमः॥ पुनः पुष्पाणि गृ
हीत्वा॥ नमो वो विप्रमूर्त्तिभ्यो लोकमातृभ्य एव च॥ लोकाधिवासिनी
भ्यश्च रोहिणीभ्यो नमो नमः॥ पश्चिमपद्भ्यां नमः॥ अथ धूपमंत्रः॥ वन
स्पतिरसोत्पन्नो गंधाढ्यो गंध उत्तमः॥ आघ्रेयः सर्वभूतानां धूपोयं प्रतिगृह्य
तां॥ अथ दीपमंत्र॥ आनंदकृत्सर्वभूतानां देवानां च सदाप्रियः॥ गोस्त्वं पाहि

नम
॥२॥ ३॥

सः हस्ते गृहीत्वा॥ ॐ अद्यामुकमासे अमुकपक्षे अमुकतिथौ अमुकवासरे अ-
मुकगोत्रे अमुकशर्मा शांत्ब्राह्मणायामेमि अंदनपुष्पाद्यर्चितवासः तांबूलहेमा-
लंकारफलादिभिः गोदानार्थं त्वामहं वृणे॥ ॐ वृतोस्मीति प्रतिवचनं य-
दर्चनं कृतं विप्र तव विष्णुस्वरूपिणः॥ तत्सर्वं मम गोदानं संपूर्णं भवेत्त्वं
समर्पय॥ एवं संप्रार्थ्य स्वपुरतः प्राङ्मुखीं गां स्थाप्य वत्समुत्तरतो न्यसे-
त्॥ अथ गोपूजाक्रमः॥ सर्वदेवप्रियं देव चंदनं मलयोद्भवं॥ कस्तूरीकुंकु-
माढ्यं वै गो गंधं प्रतिगृह्यतां॥ इति गंधमंत्रः। अथ पुष्पमंत्रः॥ या लक्ष्मीः
सर्वभूतानां या च देवेष्ववस्थिता॥ धेनुरूपेण सा देवी मम पापं व्यपो-
हतु॥ पुनः पुष्पाणि गृहीत्वा॥ विष्णोर्वक्षसि या लक्ष्मी स्वाहा या च वि-भा-

अपाने सर्वतीर्थानि परिस्रावे च जाह्नवी॥ अथ घोरो मकूपे षु पदेशे चैव स्वतोप
मः॥ वलवांश्चैव वरुणः दक्षिणे कुक्षिमाश्रितः॥ वामपार्श्वे स्थिता यक्षाः॥ तेजवं
तो महाबलाः॥ सुरमध्येषु गंधर्वाः सुराग्रेषु पन्नगाः॥ सुराणां पश्चिमे भागे स्मृत
श्चाप्सरसां गणाः॥ गोमये वसते लक्ष्मी पवित्रं लोकमंडलं॥ हुंकारे चतुरो वेदाः
रंभाया वै प्रजापतिः॥ चतुर्भिः सागरैः पूर्णा गवां चैव पयोधराः॥ अमृतः श्रवते
नित्यं पिबंति सूर्य मानवाः॥ धेनुपुच्छ करैर्ग्राह्यं सकुशं तिलतंदुलं॥ सव्यापसव्यं कृ
त्वा तर्पयेत् पितृदेवताः॥ अथ षष्ठे नुतर्पणं॥ गणपतिश्च तथा ब्रह्मा केशवो रुद्रदेव
ताः॥ लक्ष्मी सरस्वती चैव ये चान्ये च नवग्रहाः॥ ते सर्वे तृप्तिमायांतु गोपुच्छोदक
तर्पणात्॥ इंद्राधिदेवता सर्वे तथा प्रत्याधिदेवता॥ नक्षत्रं च वसवो रुद्रा विश्वेदेवा
मरुद्गणाः॥ ते सर्वे०॥ किन्नराश्च पिशाचाश्च गंधर्वोरग राक्षसाः॥ दैत्याश्च दान

6

जगन्नाथ दीपोयं प्रतिगृह्यतां ॥ अथ नैवेद्य मंत्रः ॥ वेष्णवी सुरभी माता नित्यं वि
ष्णुपदे स्थिता ॥ नैवेद्यं हि मया दत्तं सुरभी प्रतिगृह्यतां ॥ अथ आच्छादन मंत्रः ॥ आ
च्छादनं च कौशेयं श्रेष्ठं चैव सुनिर्मलं ॥ सुरभी दीयमानं तु प्रापतां स्वकिंशरीव
ति: ॥ अथ घंटा दान मंत्रः ॥ यत्ते मया र्पितं श्रेष्ठं घंटा चामर संयुतं ॥ ग्रैवेयं तद्दत्तं
गोदं मुनि त्रिदशा वंदते ॥ अथ आवाहनं ॥ आवाहयाम्यहं देवीं सुरभीं लोकमातरं
॥ पूजा त्रिभुवने देवी गंधर्वैः किन्नरैः सह ॥ अमृतं श्रवते देवि सर्व धर्म प्रव
र्त्तिते ॥ तारयस्व महादेवि दुःसहं दुःख सागरात् ॥ अप्रिये त्वां महादेवि धेनु माव
ह्ययततः ॥ इरावतीति मंत्रेण धेनु कुर्यात् प्रदक्षिणां ॥ इत्यावाहनं ॥ इंद्रोपस्थास्तु
शृंगाग्र वसते चैव नित्यशः ॥ उरस्कंधशिरो ब्रह्मा ललाटे गरुड ध्वजः ॥ कर्णापो
रश्विनौ देवौ च क्षुभ्यां शशि भास्करौ ॥ दंतेषु मरुतो देवाः जिह्वायां च सरस्वती ॥

7

ततः कंठी कृत्वा॥ सनकः सनंदनश्चैव तृतीयश्च सनातनः॥ कपिलश्चासुरिश्चैव वो-
ढुः पंचशिखस्तथा॥ ते सर्वे०॥ पितॄन् अपसव्य॥ कव्यवाडनलः सोमो यमश्चा-
र्यमा तथा॥ अग्निष्वाताः पितृगणाः बर्हिषदः सोमपास्तथा ते सर्वे॥०॥ पितापि-
तामहश्चैव तथैव प्रपितामहः॥ मातापितामही चैव तथैव प्रपितामही॥ माता-
मह्यादयः सर्वे तथैवान्याश्च गोत्रजाः॥ ते सर्वे०॥ पितृवंशे मृता ये च मातृव-
शे तथैव च॥ गुरुश्वशुरबंधूनां ये चान्ये बांधवाः स्मृताः॥ ते सर्वे०॥ ये मे कुले लु-
प्तपिंडाः पुत्रदाराविवर्जिताः॥ क्रियालोपगता ये च ये चांधाः पंगवस्तथा॥ ते सर्वे०
॥ विरूपा आमवहाचैव जाताजात कुले मम॥ वृक्षयोनिगता ये च ये च कीटपतं-
गकाः॥ ते सर्वे०॥ नरकेरौरवे घोरे महारौरवसंस्थिताः॥ असिपत्रवने घोरे कु-

वाश्चैव ये चान्ये सरसां गणाः॥ ते सर्वे०॥ पुलस्त्यः पुलहश्चैव दत्तात्रेयोथ भा
र्गवः॥ वसिष्ठोऽंगिराश्चैव कश्यपश्चैव काश्यपः॥ ते सर्वे०॥ ऋषयो मानवा दे
वाः अपस्या भूमिदेवताः॥ वांत्वधा राजला धारासा ध्याय दास्ताये बचा॥ ते
सर्वे०॥ सरितः सागराश्चैव पर्वता वनमेव च॥ लताओषधयश्चैव मगा आर
न्यवासिनः॥ ते सर्वे०॥ ब्रह्माद्या देवताः सर्वे त्रयस्त्रिंशत कोटयः॥ गायत्री चैव सा
वित्री देवपत्न्योथ मातरः॥ ते सर्वे०॥ विष्णवाद्याश्चैव ये देवा ये च वैकुंठवासिनः॥
गरुडासनमारूढा आगता पुष्ठ जो करे॥ ते सर्वे०॥ रुद्राद्याः देवता सर्वे ये च कैलास
वासिनः॥ वृषभासनमारूढा योगिन्यापीठ संस्थिताः॥ ते सर्वे०॥ आदित्याद्याः ग्रह
सर्वे अश्व्याश्व सनकादयः॥ मेषादयश्च राशीनां योगा विष्कुंभकादयः॥ ते सर्वे०॥

एतां घंटा चामर भूषितां सवत्सां कांस्य दोहां मुक्ता लांगूल विभूषितां श्री कृष्ण
प्रीत्यर्थे यथानामगोत्राय ब्राह्मणाय रुद्रदेव माध्यंदिनि शाखाध्यायने तु
भ्यमहं संप्रददे ॥ ॐ स्वस्तीति प्रतिवचनं ॥ अनेन दानेन दक्षिणां ॥ ॐ अद्य कृ
तैतद्गोदान प्रतिष्ठार्थमिदं हिरण्यमग्निदैवतं यथानामगोत्राय ब्राह्मणाय तु
भ्यमहं संप्रददे ॥ ॐ नमो गोभ्यः श्रीमतीभ्यः सौरभेयीभ्य एव च ॥ नमो ब्रह्मसुता
भ्यश्च पवित्राभ्यो नमो नमः ॥ वंदितासि वसिष्ठेन विश्वामित्रेण धीमता ॥ कपि
ले हर मे पापं यन्मया पूर्व संचितं ॥ ॐ को दात् कस्मा यादात् कामो कामोदात् कामा
यादात् कामो दाता कामः प्रतिग्रहीता कामैतत्ते ॥ ॐ या देवी सर्वभूतेषु या च वि
ष्णुपदे स्थिता ॥ धेनुरूपेण सा देवी मम पापं व्यपोहतु ॥ गावो मे अग्रतः संतु गा
वो मे संतु पृष्ठतः ॥ गावो मे हृदये संतु गावां मध्ये वसाम्यहं ॥ इति धेनुतर्पणमं

भीपाके च ये गताः ॥ ते सर्वे० ॥ ब्रह्महत्तमृता ये च सिंहसर्प्पव्याघ्रशृंगिभिः ॥ चांडा
ले नहता ये च पक्षिलोपगताश्च ये ॥ ते सर्वे० ॥ जलमध्ये मृता ये च अल्पम
लुवशं गताः ॥ नदिमध्ये मृता ये च स्त्रियाहस्तोषु ये मृताः ॥ ते सर्वे० ॥ ये च ब्र
ह्मांडखंडेषु वसंति पितृदेवताः ॥ सर्वे च मानवा नागा आगता पुच्छगोकरे ॥
ते सर्वे० ॥ अथ सरूपधेनुदानं ॥ ततः संक० ॥ श्री अद्य तत्सत् अमुकमासे अ
मुकपक्षे अमुकतिथौ अमुकवासरे अमुकगोत्रोहं सकलपापक्षयार्थं दर्व
संकल्पशतताररानंतर गंधर्वाप्सरसो गणाकीर्णा किंकिणी ज्वालामाला
विमानमंडित परमसुखभोग्यप दुःखदौर्भग्य दुःस्वप्न दुर्विघ्नप्रशमनार्थं स्वर्गलो
कप्राप्तिकामः इमां गां कृष्णा श्यामलं कृतां रुद्रदेवतां स्वर्णशृंगीं रौप्यखुरीं ताम्र

नंचैव वज्रभ्रद्यभद्दशां कृते ॥ तत्सर्वं नाशयेत्पापं कपिलांयः प्रयच्छति ॥ ९ ॥ या तयो
जन विस्तीर्णा महापारा महानदी ॥ तारयेत पितॄन्देवान्प्रभूत उदकार्णवे ॥ १० ॥
एवं गोदक्षिणादानं विप्रेषु समयोजितं ॥ पितॄन्तारयते नित्यं कुलत्रयसमुद्भवा
न् ॥ ११ ॥ यावद्वत्सस्य द्वौ पादौ मुखं चैव न दृश्यते ॥ तावत्त्वं पृथिवी ज्ञेया यावद्
गर्भं न मुंचति ॥ १२ ॥ तरुणी रूपसंपन्ना सुशीला च पयस्विनी ॥ न्यायार्जि
तां सवत्सां च घंटाभरणभूषितां ॥ १३ ॥ स्वर्णशृंगीं रौप्यखुरीं कांस्यदो
ग्धीं तथैव च ताम्रपृष्ठीं सवस्त्रां च सर्वोपस्कारसंयुतां ॥ १४ ॥ ईदृशीं चैव गां
दत्वा ब्राह्मणे वेदपारगे ॥ एतस्यां दुह्यमानायां पतंति भुवि बिंदवः ॥ १५ ॥ ता
वत्कालं वसेत्स्वर्गे गोप्रदो नात्र संशयः ॥ एषा धेनुसमा नड्वानेकश्चैव धुरंध
रः ॥ समानं सदृशं तेषां कुर्याद्दानमनुत्तमं ॥ १६ ॥ एकं च दशगव्यां दद्याद्दशाद

कल्पः ॥ युधिष्ठिर उवाच ॥ महादेवं नमस्कृत्य ब्रह्माणं पुरुषोत्तमं ॥ गवां स्तो
त्रं प्रवक्ष्यामि लोकानां शांतिवर्धनं ॥ नारदं पृच्छते राजा धर्म्मपुत्रो युधिष्ठिरः ॥
गवां च दशवर्णानां कस्य कीदृक् फलं मुने ॥ २ ॥ नारदोवाच ॥ श्वेता रक्ता तथा
पीता गौरी पांडुर धूम्रका ॥ कृष्णा च कर्बुरा चैव नीला च कपिला दश ॥ ३ ॥ श्वे
ता दत्ते श्वैरोभयात् रक्ता च कुलवर्द्धिनी ॥ पीता च धनकामस्य गौरी च सुखभो
गदा ॥ ४ ॥ धूम्रा च दुर्गकांतारी पापसंसारतारिणी ॥ कालांदी चाक्षयं दानं कृ
ष्णा रत्ना न सीदति ॥ ५ ॥ पाटला दुर्लभा लोके पांडुरी रूपकामदाः ॥ श्यामली
पुत्रकामस्य फलं धनिस्य नीलिका ॥ कपिलां ब्राह्मणे दत्वा सर्व पापैः प्रमु
च्यते ॥ पञ्चबाले कृतं पापं यौवने यत्कृतं तथा ॥ ७ ॥ बाबा कृतं कर्म्म कृतं मन
सा यच्च चिंतितं ॥ मानकूटं तुलाकूटं कन्यानृतं गवां नृतं ॥ ८ ॥ अगम्यां गम

प.
७॥

शादद्याद्वष्मातपुदः॥ प्रातैः सहस्रमोरघात्सर्वाश्रफलमाप्नुयात्॥१८॥ एकैक
स्य प्रदातव्या न वहुभ्यो कदाचन॥ साविजी ताविभक्त्या च दहत्या सप्तमं कुलं॥
॥१८॥ न जोभिः तुल्यं धनमस्ति किंचित् दुह्यंति वाह्यंति हरंति पापं॥ हरां च
रंती अमृतं श्रवंति विप्रेषु दत्ता स्कुलमुद्धरंती॥१९॥ एक कालं द्विकालं
वा यो ददाति गवाह्निकं॥ छत्र चामर संयुक्तो विमाने सोधिगच्छति॥२०॥ ग
जस्य दंते तुरगस्य कर्णे गवां च पुच्छे महिषी च पृष्ठे॥ अजाविकापास्तन
नाभि मध्ये खरवः खुरे दद्दिरा चैव भोगे॥२१॥ इति श्री जोसावित्रीपद्धतिः
समापूं संपूर्ण याम्॥ शुभं अस्तु श्री रस्तु॥ ॥श्री कृष्णाय नमः॥ ॥राम

13

राम
॥८॥